इयं आकाशवाणी
सम्प्रति वार्ता: श्रूयन्ताम्
प्रवाचक: सुनील: जोशी
अनुवादकश्च युवराज: भट्टराई

आदौ मुख्यवार्ता:

- **प्रधानमंत्री नरेन्द्रमोदी ऐषम: 'आर्टिफिशियल इंटेलीजेंस' इति कृत्तिम-बुद्धिमत्ताशिखरोपवेशनम् अद्य सायम् उद्घाटयिष्यति ।**
- **जीएसटी-इति वस्तुसेवाकरराजस्वस्य विभिन्नपक्षेषु मन्त्रणायै जीएसटी-परिषद: द्वाचत्वारिंशमुपवेशनम् प्रवर्तते ।**
- **कोविड-नवदश-संक्रमणत: स्वस्थीभूयमानानां परिमिति: प्रतिशतं दशमलवोत्तरत्रिचतुरधिकचतुरशीतिमिता जाता ।**
- **समस्तेऽपि देशे भारतीय-प्रौद्योगिकी-संस्थाने प्रवेशाय ऐषम: 'जे-ई-ई एडवांस्ड' इति प्रवेशपरीक्षाया: परिणामा: घोषिता: ।**

अपि च,

- **आई-पी-एल क्रिकेटक्रीडायाम् अद्य सायं दुबई-नगरे 'रॉयल चैलेंजर्स बैंगलोर' इति दलस्य 'दिल्ली कैपिटल्स'-दलस्य च भविष्यति संघट्ट:।**

प्रधानमंत्री नरेन्द्रमोदी अद्य सामाजिकसशक्तीकरणाय महत्त्वपूर्णम् 'आर्टिफिशियल इंटेलिजेंस' इति ऐषम: कृत्रिमबुद्धिमत्ता-उपवेशनम् उद्घाटयिष्यति। विद्युतसूचनाप्रौद्योगिकी-मंत्रालय:, नीति-आयोगश्च इदम् अन्तर्जालीयं शिखरोपवेशनम् आयोजयत:। सम्मेलनमिदं अक्तूबर-नवमीं यावत् चलिष्यति । उपवेशने महामारीनिराकरणप्रसङ्गे 'आर्टिफिशियल इंटेलिजेंस' इत्यस्य लाभोपपादनम्, नवाचाराणां सन्जालीकरणप्रोत्साहनम्, सफलनवाचारार्थं समावेशिककृत्रिमबुद्धिमत्ता, सहभागिता चेति विषया: चर्चिष्यन्ते ।'सब का साथ सब का विकास' इति लक्ष्येन साकं प्रधानमंत्रिण: नरेन्द्रमोदिन: योजनेयं समावेशिविकासे कृत्रिमबुद्धिमत्ताया: लाभस्वीकरणमस्ति, यद्धि समेषां कृते कृत्रिमबुद्धिमत्ता

इति देशस्य कार्यनीते: प्रतीकभूतमस्ति । प्रधानमंत्री नरेन्द्रमोदी प्रावोचत् यत् असौ सामाजिकसशक्तिकरणाय उत्तरदायी 'आर्टिफिशियल इंटेलिजेंस' इति शिखरोपवेशनम् संबोधयितुं समुत्सुकोऽस्ति । एकस्मिन् ट्वीट-सन्देशे श्रीमोदी प्रत्यपादयत् यत् शिखरसम्मेलनमिदम् अस्मिन् क्षेत्रे कार्यरतान् जनान् एकस्मिन् मञ्चे समानेष्यति, येन कृत्रिमबुद्धिमत्ताया: विभिन्न-पक्षेषु वैश्विकरूपेण चर्चा सम्भविष्यति।

वस्तुसेवाकरपरिषद: द्वाचत्वारिंशम् उपवेशनम् संप्रति नवदिल्ल्यां प्रचलति । वित्तमन्त्री निर्मलासीतारामनवर्या 'वीडियो कॉन्फ्रेंस' माध्यमेन उपवेशनम् अध्यक्षयति । वित्त-राज्यमंत्री अनुरागठाकुर: राज्याणां केंद्रशासितप्रदेशानां च वित्तमन्त्रिण: अस्मिन्नुपवेशने भागं भजन्ति । वस्तुसेवाकरपरिषद: विगतोपवेशने केन्द्रप्रशासनेन राज्येभ्य: प्रवर्तमानवित्तवर्षस्य वस्तुसेवाकरराजस्व-अपचिते: परिपूर्तये ऋणद्वयस्य विकल्प: प्रदत्त: आसीत्। अस्यानुरूपं राज्याणि 'रिजर्व बैंक' इति वित्तकोशत: विशेषव्यवस्थाया: अन्तर्गतं सप्तनवतिसहस्रकोटिरूप्यकाणि ऋणत्वेन स्वीकर्तुं शक्नुवन्ति, उत वा विपणित: पञ्चसहस्रोत्तरद्विलक्षकोटिरूप्यकाणाम् ऋणं स्वीकर्तुं अर्हिष्यन्ति। वित्तमंत्रालयस्य सूत्रै: प्रतिपादितं यत् एकविंशतिराज्यै: वस्तुसेवाकरराजस्व-अपचिते: परिपूर्तये रिजर्व-बैंक-त: सप्तनवतिसहस्रकोटिरूप्यकाणि ऋणत्वेन स्वीकरणस्य विकल्प: प्रचित: अस्ति।

प्रशासनेन प्रोदितं यत् देशे कोविड-नवदश-रोगत: स्वस्थीभूयमानानां परिमिति: प्रतिशतं दशमलवोत्तरत्रिचतुरधिकचतुरशीतिमिता जाता । विगतचतुर्विंशतिहोरावधौ षट्-सप्तति-सहस्राधिका: रूग्णा: स्वस्थीभूता: सूच्यन्ते। स्वास्थ्यमंत्रालय: प्रत्यपादयत् यत् स्वस्थतां गतानाम् आहत्य संख्या षड्-अशीति-सहस्रोत्तर-पञ्च-पञ्चाशल्लक्षमिततोऽधिका सञ्जातास्ति । स्वस्थीभूयमनानां संख्या सततं समेधतेतरामिति कृत्वा वर्तमाने संक्रमितजनानां संख्या आहत्य संक्रमितप्रकरणानां प्रतिशततादृशा केवलं चतुर्दश-दशमलव-एकं-एकं प्रतिशतमेव अवशिष्टमस्ति। अस्मिन् समये देशे चतुस्त्रिंशत्सहस्राधिक-नवलक्षमिता: जना: उपचार्यणा सन्ति। विगतचतुर्विंशतिहोरावधौ द्वाचत्वारिंशदधिक-चतुश्शताधिकचतु:सप्ततिसहस्रजनेषु कोरोना-संक्रमणस्य पुष्ट्या साकमेव संक्रमित-जनानां आहत्य संख्या त्रयोविंशतिसहस्राधिकषट्-षष्टिलक्षाधिका जातास्ति । तेलंगानाराज्ये विगतचतुर्विंशति होरावधौ कोविड-प्रकरणस्य पञ्चत्रिंशदुत्तरत्रिशताधिकैकसहस्रमितानां

नवीन-प्रकरणानां पुष्टि: लक्षिता । महाराष्ट्रराज्ये षण्मासाभ्यन्तरे पुनः चतुर्लक्षाधिका: भोजनालयाः मद्यशालाश्च उद्घटिताः । असमराज्यपरिवहननिगमेन राज्ये सार्धषट्शत-बसयानानां प्रचालनस्य निर्णयः स्वीकृतः ।

दिल्ल्या: भारतीयप्रौद्योगिकी-संस्थानेन ऐषम: 'जेईई एडवांस्ड' इति परीक्षाया: परिणामस्य घोषणा विहिता । परीक्षापरिणाम: 'result.jeeadv.ac.in' इत्यत्र द्रष्टुं शक्यते । शिक्षामन्त्री डॉ. रमेशपोखरियाल निशंक: परीक्षाया: सफल-आयोजनार्थं, यथाकालं परिणामघोषणार्थं च संस्थानमिदं वर्धापितम् । अमुना निज-ट्वीट-श्रृंखलायाम् अपेक्षानुरूपं समुचितश्रेण्या समुत्तीर्णा: विद्यार्थिनश्चापि भृशं वर्धापिता:, सहैव ते आग्रहिता: यत्ते भविष्यकाले आत्मनिर्भरभारतस्य कृते कार्यं कुर्यु: । श्रीनिशंक: न्यगदत् यत् आकांक्षानुरूपं श्रेण्या अनुत्तीर्णविद्यार्थिनां कृतेऽपि भूरि-अवसरा: सन्ति उपलब्धा: । अमुना भणितं यद् विद्यार्थिभि: इदम् अवधेयं यत् केवलं काचिदपि परीक्षा तान् परिभाषयितुं न शक्नोति ।

उत्तरप्रदेश-आरक्षिबलेन हाथरस-घटनासंबंधितप्रकरणे आपराधिकषडयंत्रविधानस्य राज्ये साम्प्रदायिकहिंसाप्रोत्साहनस्य आरोपे, एका प्राथमिकी पञ्जीकारितास्ति । हाथरस-जनपदस्य चांदपा-आरक्षिस्थात्रे पञ्जीकारितायाम् अस्यां प्राथमिक्यां आपराधिकषडयंत्रस्य, सूचनाप्रविधि-अधिनियमस्य अष्टोत्तरद्विसहस्रतमवर्षीयनियमानुसारेण प्रकरणं पञ्जीकारितमस्ति । आरक्षिबलेन सबलं प्रतिपाद्यते यत् प्रशासनम् अस्थिरी-कर्तुमेकं बृहत्-षड्यंत्रं विरचय्य विदेशस्थजनै: साकं सम्भूय एतदर्थमेकं लिंक इति संपृक्तिसहितं वेबफलकमपि विरचितम् आसीत् ।

डी-आर-डी-ओ इति रक्षानुसन्धानविकाससंघटनेन 'सुपर-सोनिक-मिसाइल' इत्यन्तर्गतम् 'असिस्टेड-रिलीज-ऑफ-टॉरपेडो-स्मार्ट' इत्यस्य अस्त्रस्य सफलं परीक्षणं कृतम् । रक्षामंत्रिणा डी-आर-डी-ओ इति अभियानेन सह सम्पृक्तेभ्यः अन्येभ्यः जनेभ्य: उक्तं यत्, anti-submarine warfare इति समुद्रवह्निप्रतिरोधि-आसवे क्षमताविकासवृद्ध्यर्थं इयमेका महत्वपूर्णा प्रौद्योगिकीय-उपलब्धि: सिद्धा भविष्यति ।

दिल्ल्याः मुख्यमंत्री अरविंदकेजरीवाल: प्रोक्तवान् यद् राजधान्यां विगतकतिपयेषु वर्षेषु प्रदूषणस्तरे न्यूनता दृष्टा, परञ्च अस्याः समस्याया: निरसनार्थम् अधुना अपि नैके पदक्षेपाः सन्ति आवश्यकाः ।

दक्षिणमुंबईस्थिते एकस्मिन् भवने दुरापन्ने अग्निकाण्डे अष्टादशहोरानन्तरमपि अग्निशमनकार्याभियानं प्रवर्तते ।

भारतीयथलसेनाप्रमुखः जनरल मनोजमुकुन्दनरवणेवर्य: विदेशसचिवः हर्ष-श्रृंगला च द्वि-दिवसीययात्राप्रसङ्गे म्यांमादेशं गच्छत: । यात्राया: उद्देश्य: संपर्क-रक्षा-सुरक्षाभिः सहिता: कतिपयेषु अन्येषु क्षेत्रेषु संबंधविस्तारीकरणं वर्तते ।

आई-पी-एल क्रिकेटक्रीडामालिकायाम् अद्य सायं 'रॉयल चैलेंजर्स' बंगलूरु इत्यस्य द्वन्द्वः 'डेल्ही कैपिटल्स' इत्यनेन सह भविष्यति । ह्यो रात्रौ दुबई-नगरे क्रीडिते क्रीडाचक्रे 'चेन्नई सुपर किंग्स' इति दलेन 'किंग्स इलेवन पंजाब' इति वृन्दं दशक्रीडकहानिपुरस्सरं पराजितम् । प्रथमं क्रीडता 'किंग्स इलेवन पंजाब' इति दलेन निर्धारित विंशति: कन्दुकप्रेक्षपणचक्रीये क्रमे चतु:क्रीडकहानिपूर्वकं अष्टसप्तत्युत्तरैकशतधवनाङ्का: अर्जिता:। दलप्रमुखेण 'के. एल. राहुलेन' द्विपञ्चाशत् कन्दुकेषु त्रिषष्टिधावनाङ्का: 'निकोलस पूरन' इति क्रीडकेन च सप्तदशकन्दुकेषु त्रयस्त्रिंशत् धावनाङ्का: समर्जिता: ।

इति वार्ताः